# AMRITA VIDYALAYAM

## AMRITA PRE BOARD EXAMINATION 1 - 2017 - '18

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

| | | |
|---|---|---|
| खण्डः क | अपठितांश अवबोधनम् | 10 अङ्काः |
| खण्डः ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः ग | अनुप्रयुक्त व्याकरणम् | 25 अङ्काः |
| खण्डः घ | पठित अवबोधनम् | 30 अङ्काः |

## खण्डः क – अपठितांश अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।**

ईश्वरस्य भक्तः एकः बालकः आसीत्। एकदा ईश्वरः स्वप्ने तमकथयत् – "त्वं तु मम भक्तः असि, अतः मम एकं कार्यं कुरु। तव गृहात् बहिः एका शिला अस्ति। तां शिलां तत्स्थानात् अपसारय।" तस्य बालकस्य ईश्वरे दृढविश्वासः आसीत्। अतः अविचार्य एव सः ईश्वरादेशम् अमन्यत। प्रातःकाले उत्थाय सः बृहच्छिलाम् अपश्यत्। ईश्वरं स्मृत्वा बालकः तस्मिन् कार्ये नियुक्तः जातः। तदा तं दृष्ट्वा जनाः अकथयन् – "अस्याः शिलायाः अपसारणम् असम्भवम्, अतः वृथा परिश्रमं मा कुरु।" परं सः बालकः तस्मिन् कार्ये संलग्नः अभवत्। इत्थं कार्यं कुर्वन् तस्य शरीरं तु बलवत् अभवत् परं सः निराशः जातः। रात्रौ स्वप्ने पुनरागतम् ईश्वरं सः अकथयत् मया कृतः श्रमः तु व्यर्थः जातः। शिला तु तत्रैव वर्तते। स्मितमानः ईश्वरः प्रत्यवदत् संसारेऽस्मिन् किमपि कार्यं तु निष्फलं न भवति। पश्य, निर्बलः त्वं अधुना सबलः असि। जीवने कदाचित् परोक्षः लाभः लभते।

**प्रश्नाः**

**I. एकपदेन उत्तरत।** **2**

i. कं स्मृत्वा बालकः कार्यम् अकरोत्?
ii. बलवत् किम् अभवत्?
iii. प्रातः उत्थाय सः काम् अपश्यत्?
iv. कस्य ईश्वरे दृढविश्वासः आसीत्?

**II.** **पूर्णवाक्येन उत्तरत।** **4**

i. जना: किम् अकथयन्?

ii. स्वप्ने आगतम् ईश्वरं बालक: किमकथयत्?

**III.** **प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत।** **2**

i. 'अमन्यत्' इति क्रियापदस्य कर्तृपदं किम्?
(ईश्वर:, जन:, भक्त:, स: {बालक:})

ii. 'विस्मृत्य' इति पदस्य किं विपरीतपदम् अत्र प्रयुक्तम्?
(अविचार्य, उत्थाय, स्मृत्वा, दृष्ट्वा)

iii. 'स्मितमान:' इति पदं कस्य विशेषणपदम् अस्ति?
(बालकस्य, भक्तस्य, जनस्य, ईश्वरस्य)

iv. 'त्वं तु मम भक्त: असि' अत्र 'त्वम्' इति पदं कस्मै प्रयुक्तम्?
(जनाय, बालकाय, ईश्वराय, भक्ताय)

**IV.** **अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्ड: ख - रचनात्मककार्यम्

**2.** **दूरभाषयन्त्रस्य निष्क्रियतां दूरीकर्तुं दूरभाषकेन्द्रस्य निदेशकं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत।** **5**

सविधे
निर्देशक: महोदय:
दूरभाषकेन्द्रम्
दिल्लीनगरम्
विषय: - दूरभाषयन्त्रस्य निष्क्रियता।
मान्यवर

सेवायाम् i. -------- यत् अहं दिल्लीनगरे वसामि। मम ii. ------- दूरभाषसङ्ख्या 29365178 अस्ति। इयं iii. ------- गतसप्ताहात् iv. --------- न करोति। अहं v. --------- अपि अस्मि अत: बहुकष्टम् अनुभवामि। कृपया vi. ------- दूरभाषस्य vii. -------- दूरीकृत्य मम viii. --------- कुर्वन्तु इति ix. -------- अस्ति। x. ----------- भवद्भ्य:।

निवेदक:
विकास:
दिल्लीनगरम्
दिनाङ्क:

मञ्जूषा

| |
|---|
| प्रार्थना, धन्यवाद:, गृहस्य, दूरभाष, निवेदयामि, सहायतां, कार्यम्, अचिरात्, विकृतिम्, अस्वस्थ: |

3. **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।** **10**



मञ्जूषा

| |
|---|
| छात्राः, पादपानाम्, लक्षम्, कुर्वन्ति, शिक्षकैः, पर्यावरणम्, सम्भूय, क्षेत्रे, विशालम्, वृक्षारोपणम्, वनमहोत्सवः। |

अथवा

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चसंस्कृतवाक्येषु एकम् अनुच्छेदं लिखत।

भारतीय - कृषकः

मञ्जूषा

| |
|---|
| अन्नम्, वपति, वर्षाजलम्, बीजानि, कृषिक्षेत्रेषु, पशवः, शोचनीयदशा, आधुनिकयाधनैः, धनाभावेन, परिश्रमम्। |

## खण्डः ग - अनुप्रयुक्त व्याकरणम्

4. **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धि / सन्धिच्छेदं कृत्वा लिखत।** **4**

i. यथोचितं कार्यं कुरुः।
(यथो + उचितं, यथा + उचितं, यथ + उचितं, यथा + ओचितं)

ii. रावणस्तु जगत् + शत्रुः आसीत्।
(जगछत्रुः, जगत्छत्रुः, जगच्छत्रुः, जगश्शत्रुः)

iii. सैनिकः राष्ट्रस्य नयनम् मन्यते।
(ने + अनम्, ने + आयनं, नय् + अनं, नय् + एनं)

iv. आश्रमे उभौ + अपि अतिथी तिष्ठतः।
(उभावपि, उभौवपि, उभावेव, उभावपी)

**5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **4**

i. विमूढधीः पक्वं फलं त्यक्त्वा अपक्वं खादति।
(विमूढधीः यस्मै सः, विमूढ धीः यस्य सः, विमूढा धीः यस्य सः, विमूढाः धियः यस्मिन्)

ii. पाणी च पादौ च प्रक्षाल्य भोजनं कुरु।
(पाणीपादाः, पाणिपादौ, पाणिपादं, पाणिपादौ तयोः)

iii. सरोवरे नीलानि कमलानि शोभन्ते।
(नीलकमलं, नीलंकमलं, नीलकमलानि, नीलस्यकमलानि)

iv. मुनिः उपगङ्गं तपः करोति।
(गङ्गायाः समीपं, गङ्गायाः पश्चात्, गङ्गायाः दूरे, गंगा समीपं)

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति प्रत्ययौ संयोज्य विभज्य वा उचितमुत्तरं विकल्पेभ्यः चित्वा लिखत।** **4**

i. अद्य मम गृहे धार्मिकः उत्सवः भविष्यति।
(धर्म + ठक्, धार्म + ठक्, धर्म + टाप्, धर्म + इकः)

ii. वद् + शतृ ललनाः सभां प्रविशन्ति।
(वदती, वदन्त्यः, वदन्ती, वदन्तिनः)

iii. सज्जनानां वाचि कठोर + तल् न वर्तते।
(कठोरा, कठोरता, कठोरतां, कठोरतायाः)

iv. तेषां वचनानि ग्रह् + अनीयर् भवन्ति।
(ग्रहणीयं, ग्रहणीयानि, ग्रहणीयाः, ग्रहणीयः)

**7. अधोलिखित संवादे रिक्तस्थानानि वाच्यानुसारं प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा पूरयत।** **3**

दिवाकरः – राहुल! अधुना त्वं कुत्र गच्छसि?

राहुलः – i. --------- मन्दिरं गम्यते।
(मया, अहं, त्वया, त्वम्)

दिवाकरः – तत्र त्वं किं करोषि?

राहुलः – तत्र मया देवाः ii. -----------।
(नम्यते, नम्यन्ते, नमन्ति, नमन्ते)

दिवाकरः – तर्हि त्वं तु भक्तः असि।

राहुलः – नहि, नहि अहं तु सामान्यः iii. -------------।
(अस्मि, अस्ति, असि, भवति)

**8. विद्यालयस्य वार्षिकोत्सवे कः कः कार्यक्रमः कतिवादने भविष्यति इति समयं अङ्कानां स्थाने संस्कृतपदैः पूरयत।** **2**

i. प्रातः 9:15 वादने सरस्वती वन्दना।
(सपादनव, सपादः नव, सपादनवं, नवसपादं)

ii. प्रात: 9:30 वादने सांस्कृतिक कार्यक्रमा:।
(सार्ध: नव, सार्धनव, पादोन नव, सार्धं नवं)

iii. प्रात: 10:45 वादने प्रधानाचार्येण वार्षिक विवरणं प्रस्तूयिष्यते।
(सपाद दश, पादेन एकादश, पादोन दश, सपादैकादश)

iv. 12:00 वादने मुख्यातिथिना पुरस्कार वितरणम्।
(द्वादश, पादोन द्वादश, सपाद द्वादश, द्वेदश)

**9. अधोलिखित वाक्येषु रिक्तस्थानानि उचितपदं विकल्पेभ्य: चित्वा पूरयत। 4**

i. वर्षायां भ्रमणाय गृहात् ---------- मा गच्छ।
(न, पुरा, इतस्तत:, बहि:)

ii. शंखनाद: ----------- कर्तव्य:।
(कुत:, उच्चै:, सदा, पुरा)

iii. श्रीकृष्ण:, अर्जुनम् उपादिशत् --------- युद्धं कुरु।
(अत्र, यत्, अपि, एव)

iv. ------------ रविवासर: अस्ति।
(अद्य, श्व:, अधुना, ह्य:)

**10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत। 4**

i. मह्यं फलानि न <u>रोचते</u>।
(रोचे, रोचेते, रोचन्ते, रोचथे)

ii. <u>तपसेन</u> किं न सिध्यति।
(तप:, तपसा, तपस्या, तपस्)

iii. शिष्या: <u>सुन्दरं</u> चित्राणि पश्यन्ति।
(सुन्दराणि, सुन्दराणी, सुन्दरणि, सुन्दर:)

iv. दूरत: <u>पर्वतानि</u> रम्या:।
(पर्वता:, पर्वत, पर्वता, पर्वत:)

## खण्ड: घ - पठित अवबोधनम्

**11. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

**अ. गद्यांश:**

विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मण: द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बुद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैक देशे यमुनातीरे दिल्लीमण्डले 'नन्दन' नाम संवत्सरे, सूर्योत्तरायणे, वसन्ततौं चैत्रमासे शुक्लपक्षे, प्रतिपदायां तिथौ गुरुवासरे उत्तराभाद्रपदनक्षत्रे, शुक्लयोगे किंस्तुघ्नकरणे नामाहं मंगलकार्यं करिष्ये।

**I. एकपदेन उत्तरत।** 2

i. दिल्लीनगरं कस्याः तीरे अस्ति?

ii. यजमानः किं कर्तुम् इच्छति?

**II. पूर्णवाक्येन् उत्तरत।** 2

अस्मिन् सङ्कल्पे स्थानवाचकाः के के शब्दाः आगताः?

**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत।** 2

i. 'करिष्ये' इति क्रियापदस्य कर्तृपदं किम्?

(शुक्लयोगे, नाम, अहम्, मङ्गलकार्यं)

ii. 'अष्टाविंशतितमे कलियुगे' अनयोः पदयोः विशेष्यपदं किम्?

(विंशतितमे, अष्टाविंशतिः, अष्टाविंशतितमे, कलियुगे)

iii. अनुमत्या इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(करणे, आज्ञया, तिथौ, चरणे)

iv. 'कृष्णपक्षे' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(शुक्लयोगे, प्रथमचरणे, शुक्लपक्षे, करणे)

**आ. पद्यांशः**

"अवक्रता यथा चित्ते तथा वाचि भवेद् यदि
तदेवाहुः महात्मानः समत्वमिति तथ्यतः" ॥

**I. एकपदेन उत्तरत।** 2

i. नरस्य चित्ते किं भवेत्?

ii. वाचि किं न भवेत्?

**II. पूर्णवाक्येन उत्तरत।** 2

समत्वं किं कथ्यते?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** 2

i. 'सरलता' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

(अवक्रता, चित्ते, तदेव, तथ्यतः)

ii. श्लोकस्य द्वितीये पंक्तौ क्रियापदं किम्?

(तत्, आहुः, तथ्यतः, समत्वम्)

iii. 'वाचि' इति पदस्य का विभक्तिः?

(प्रथमा, षृठी, सप्तमी, पञ्चमी)

iv. 'भवेत्' इति क्रियापदस्य कर्तृपदं किम्?

(चित्ते, अवक्रता, वाचि, यदि)

**इ. नाट्यांशः**

काकः – (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते का, का ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

राजहंसः - हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति।

काकः - (विहस्य) कुक्कुटः। अरे, अद्य कुतः कुक्कुटाः नगरेषु? अहमेव सर्वत्र सुलभः।

राजहंसी - भोः भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि।

काकः - अहो अज्ञानं भवत्याः। अरे। यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति। किं बहुना। अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति - अनृतं वदसि चेत् काकः दशेत्। अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव।

**I. एकपदेन उत्तरत।** **2**

i. अद्य काकः कुत्र न सुलभः?

ii. कर्तव्यपरायणः कः अस्ति?

**II. पूर्णवाक्येन उत्तरत।** **2**

जनाः किमर्थं हृष्यन्ति?

**III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।** **2**

i. 'करोति' इति क्रियापदस्य कर्तृपदं किम्?
(एतत्, कार्यं, कुक्कुटोऽपि, कुक्कुटः)

ii. 'सत्यं' इति पदस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?
(असत्यं, अनृतं, मिथ्या, सत्यप्रियः)

iii. 'अस्माकम् ऐक्यं' - अत्र अस्माकं पदं केभ्यः प्रयुक्तम्?
(राजहंसेभ्यः, कुक्कुटेभ्यः, जनेभ्यः, काकेभ्यः)

iv. 'कटुभिः क्वणितैः' अनयोः पदयोः विशेषणपदं किम्?
(स्वीयैः, कटुभिः, क्वणितैः, अन्यत्)

**12. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित श्लोकद्वयस्य अन्वयं पूरयत।** **4**

क. " अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते" ॥

अन्वयः - यत् वाक्यं i. ------- सत्यं, प्रियहितं च तथा स्वाध्याय ii. ------ च iii. ------- वाङ्मयं iv. -------- उच्यते।

ख. "चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्" ॥

अन्वयः - कृष्ण! मन हि i. ----- प्रमाथि बलवद्दृढम्। ii. ------- तस्य iii. ------ वायोः iv. ------- दुष्कारं मन्ये।

मञ्जूषा

| चञ्चलं, तपः, अनुद्वेगकरं, एव, अहं, इव, अभ्यसनं, निग्रहं |
| --- |

**13. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

i. मेषस्य क्षितौ प्रलुठतः तृणेषु <u>वह्निज्वालाः</u> समुत्थिताः।

ii. <u>शशिनः</u> किरणसमाः एव सज्जनाः।

iii. वध्योऽसि अद्य <u>मया</u>।

iv. तवाङ्ग गोम्पा <u>बौद्धानां</u> मठः।

**14. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत।** **4**

i. एतत् <u>कुण्डं</u> लोहितनद्याः किञ्चित् दूरे अस्ति।
(जलधारा, जलस्थानं, घटः, जलपात्रं)

ii. द्वादश <u>समाः</u> पर्जन्यः तद्राष्ट्रं न अभिवर्षति।
(मासाः, वर्षाणि, युगानि, दिनानि)

iii. <u>व्रजन्तौ</u> तौ बालकान् अवदताम्।
(पश्यन्तौ, आगच्छन्तौ, गच्छन्तौ, क्षिपन्ती)

iv. <u>आर्तानां</u> परित्राणाय एव मे निश्चयः।
(नराणां, मनुष्यानां, आगन्तुकानां, दुःखीनाम्)